# .. vAstuvidyA ..

# ॥ वास्तुविद्या ॥

प्रथमोध्यायः

गजास्यमगजापुत्रं विंघ्नाद्रिभिदुरं शिवम् ।
नमामि वचसां देवीं मन्दारकुसुमप्रभाम् ॥
प्रणम्य विकर्माणं शिल्पिनां परमेरम् ।
वास्तुविद्यां प्रवक्ष्यामि यथाशक्ति समासतः ॥ १॥
तत्रादौ सम्प्रवक्ष्यामि सर्वेषां मानसाधनम् ।
मानेनैवाखिलं लोके वस्तु संसाध्यते यतः ॥ २॥
परमाणुः क्रमाद् वृद्धो मानाउल इति स्मृतः ।
परमाणुरिति प्रोक्तो योगिनां द्दृष्टिगोचरः ॥ ३॥
परमाणुभिआष्टाभिस्त्रसरेणुरिति स्मृतः ।
त्रसरेणुह्न रोमाग्रं लिक्षायूकायवास्तथा ॥ ४॥
क्रमशोऽष्टगुणाः प्रोक्ता यवोऽष्टगुणितोऽौलिः ।
औलं तु भवेन्मात्रं वितथ्स्तर्द्वादशाउलः ॥ ५॥
तद्वयं हस्त उद्दिष्टः स च किष्कुरिति स्मृतः ।
पत्र्चविंशतिमात्रस्तु प्राजापत्य इति स्मश्तः ॥ ६॥
षड्विंशतिर्धनुर्मुष्टिः सप्तविंशद्धनुर्ग्रहः ।
अष्टविंशाउलः प्राच्यो वैदेहो नवविंशतिः ॥ ७॥
वैपुल्यस्त्रिंषदौल्यस्त्वेकत्रिंषत् प्रकीर्णकः ।
याने च शयने ष्किउः प्राजापत्यो विमानके ॥ ८॥
वास्तुनां च धनुर्मुष्टिर्ग्रामादीनां धनुर्ग्रहः ।
सर्वेपामपि वास्तुनां किष्कुरेवाथवा मतः ॥ ९॥
उत्तरेण जगत्या वा जन्मना वा प्रकीर्तितः ।
दण्डस्तु सुरधिष्णेशु मानुष्येषु चतुष्करः ॥ १०॥
अथ वक्ष्यामि संक्षेपाच्छिल्पिनां लक्षणं पृथक् ।
स्थपतिः स्थापनार्हः स्यात् सर्व शास्त्रविशारदः ॥ ११॥
नहीनाओऽतिरिक्ताओ धार्मिकस्तु दयापरः ।
अस्मात्सर्योऽनसूयह्न ता&i; न्त्रिकस्त्वभिजातवान् ॥ १२॥
गणितज्ञः पुराणज्ञ बानन्दात्माप्यलुब्धकः ।
चित्रज्ञः सर्वदेशज्ञः सत्यवादी जिते&i; न्द्रियः ॥ १३॥
अरोगी चाप्रमादो च सप्तव्यसनवर्जितः ।
सुनामा द्दढबन्धुह्न वास्तुविद्याब्धिपारगः ॥ १४॥
स्थ्पतेस्तस्य शिष्यो वा सूत्रग्राही सुतोऽथवा ।



From http://sanskritdocuments.org
sanskritdocuments.org

स्थपत्याज्ञानुसारी च सर्वकर्म&i; विशारदः ॥ १५॥
सुत्रदण्डप्रमाणज्ञो मानोन्मानप्रमाणवित् ।
तक्ष्तिआनां तक्षकेणाप्युपर्युपरि यु&i; क्तितः ॥ १६॥
वृद्धिकृद् वर्धकिः प्रोक्तः सूत्रग्राहयनुगः सदा ।
तक्षणात् स्थ्थुलसुक्ष्माणां तक्षकः स तु कीर्तितः ॥ १७॥
मृत्कर्मज्ञो गुणी शक्तः सर्वकर्मस्वतन्त्रकः ।
गुरुभक्तः सदा हृष्टाः स्थपत्याद्यनुगः सदा ॥ १८॥
एभिर्विनापि सर्वेषां कर्म कर्तु न शक्यते ।
तस्मादेषां सदा पूज्यं स्थपत्यादिचतुष्टयम् ॥ १९॥
एभिः स्थपत्यादभरत्र लोके विना ग्रहीतुं सुकृतं न शक्यम् ।
तैरेव सार्धे गुरुणाथ तस्माद् भजन्ति मोदं भजमानमर्त्याः ॥ २०॥
इति वास्तुविद्यायां साधनकानं नाम प्रथमोऽध्यायः ।

---

द्वितियोध्यायः

अथातो वास्तुविद्यां वै प्रवक्षामि यथापुरम् ।
पूर्वे भूमिं परीक्षेत वह्लाद् वास्तु समारमेत ॥ १॥
भुवः प्लवं प्रवक्षामि नराणां च शुभाशुभम् ।
पूर्वप्लवा वृद्धिकरी उत्तरा धनदा स्मृता ॥ २॥
अर्थक्षयकरी विद्यात् पह्लिमप्लवनां ततः ।
दक्षिणप्लवना पृथ्वी नराणां मृतिदा भवेत् ।
वारुणोच्चसमायुक्ता नीचमाहेन्द्रसंयुता ॥
गोवीथिरिति सा ज्ञेया ऐन्द्रोच्चा नीचवारुणा ।
जलवीथीरिति प्रोक्ता वास्तुज्ञानविशारदे ॥ ४॥
सोमोच्चयमनीचा च यमवीथीति कथ्यते ।
यमोच्चसोमनीचाच गजवीथीति कथ्यते ॥ ६॥
ईशोच्चं निरृ&0Tr; तौ नीच भूतलं भूतवीथिकम् ।
आग्नेयोच्चं वायुनीचं नागवीथी प्रशस्यते ।
वायूच्चमग्निनीचं यद वीथिंआं वैश्वानरी विदुः ।
निरृ&0Tr; त्युच्चमीशनीचं धनवीथीत्युदाहृता ॥
आग्नीच्चं मारुतसोमयोः ।
सुपथं नाम तद्वास्तु प्रशस्ते सर्वकर्मणाम् ॥
सोमेशानन्तरं नीचमुच्चं निरृ&0Tr; तिकालयोः ।
दीर्घायुर्नाम तद्वास्तु प्रशस्तं कुलवर्धनम् ॥
ईशानेन्द्रान्तरं नीचमुच्चं वरुणरक्षसौः ।
पुण्यकं नाम तद्वास्तु द्विजानां च शुभावहम् ॥ १२॥
इन्द्राग्न्योरन्तरं नीचमुच्चं वायुजलेशयोः ।
अपथं नाम तद्वास्तु व्एराय कलहाय च ॥


From http://sanskritdocuments.org

कालाग्न्योरन्तरं नीचमुच्चं स्याद्वायुसोमयोः ।
रोगकुन्नाम तद्वास्तु नराणां रोगवृद्धिकृत् ॥
निऋ&0Tr; त्यन्तकयोर्नीचमुच्चं सोमशिवान्तरम् ।
अर्गल नाम तद्वास्तु ब्रह्महत्यादिनाशकृत् ॥१५॥
रुद्रेन्द्रान्तरमुच्चं स्यान्नीचं वरुणरक्षसोः ।
श्मशानं नाम तद्वास्तु केवलं कुलनाशनम् ॥१६॥
नीचमग्नो भवेदुच्चं निऋ&0Tr; तीशानवायुषु ।
श्येनकं नाम तद्वास्तु नाशाय मरणाय च ॥
रुद्राग्निवरुणेषुच्चं नीचं स्यानिऋ&0Tr; तौ तथा ।
मुखं नाम तद्वास्तु दारिद्र्यं कारयेत् फलम् ॥
निऋ&0Tr; त्याग्निशिवेएषुच्चं नीचं वह्नीन्द्रयोस्तथा ।
ह्यग्नं नाम तद्वास्तु नेष्टं प्राणभृतां सदा ।
अग्नौ यदि भवेदुच्चं नीचं निऋ&0Tr; तिरुद्रयोः ।
वातनिम्नं च तद्वास्तु स्थावरं नाम शोभनम् ॥२०॥
उच्चं निऋ&0Tr; तिभागे स्यान्नीच्चं ज्वलनवातयोः ।
रुद्रनिम्नं च तद्वास्तु स्थण्डिलं नाम शोभनम् ॥२॥
रुद्रोच्चं यदि निम्नं स्याद् वह्नौ निऋ&0Tr; तिवातयोः ।
शाण्डुलं नाम तद्वास्तु प्रापयत्यशुभं सदा ॥२२॥
निऋ&0Tr; त्याग्निशिवेएषुच्चं नीचं चन्दस्रमं प्रति ।
द्विजेद्राणं तु सुस्थानमवनी समुदाहृता ॥२॥
नीचमिन्द्रे भवेदुच्चं निऋ&0Tr; त्यां पह्निमानिले ।
सुलभं जसुतलंट नाम तद्वास्तु राजराष्ट्रविवर्धनम् ॥२॥
सौम्येशपवनेषूच्चं नीचं भवति चेद् यमे ।
नाम्ना वास्तुचरं नाम वैश्यानां तदभीष्टदम् ॥२५॥
नीचं वारुणमुच्चं चेदीशानेन्द्राग्निषु क्रमात् ।
मुखं नाम तद्वास्तु शूद्राणां तदभीष्टदम् ॥२६॥
या तु सोमप्लवा चैव कुशदर्भैरलङ्कृता ।
आज्यगन्धा च सा भूमिर्ब्राह्मणानां प्रशस्यते ॥२॥
पूर्वप्लवा च रक्ता च कुशदर्भैरलङ्कृता ।
रक्तगन्धा च या भूमिः क्षत्रियाणां प्रशस्यते ॥२॥
द&i; क्षिणप्लवनोपेता कुशदर्भैरलङ्कृता ।
अन्नगन्धा च या भूमिः सा वैश्यानां प्रशस्यते ॥२॥
पह्निमप्लवनोपेता दूर्वाभिह्न समन्विता ।
सुरागन्धा च या भूमिः शूद्राणां समुदाहृता ॥९॥
इन्द्रोन्नतं पुत्रनाशं वयुन्नतमथार्थदम् ।
अग्निनीचोऽर्थनाशः स्याद् याम्योन्नतमरोगकृत् ॥


From http://sanskritdocuments.org

निरृत्युच्चं श्रियो लाभं पुत्रदं वरुणोन्नतम् ।
वायुन्नतं द्रव्यनाशं सौम्योन्नतमथो गदः ॥ २॥
ईशानोच्चं महाक्लेशं वास्तु विद्यादिति कॢर&1Bra; मात् ।
वर्णक्र&1Bra; मेणाथ विद्याद् वृक्षान् शास्त्र&i; विशारदः ॥
न्यग्रोधः पूर्वतो धन्यो दक्षिणे च उदुम्बरः ।
अत्थ्यः पह्निमे श्रेष्ठः प्लक्षोऽप्युत्तरतः शुभः ॥
अत्थ्यः पूर्वतो वर्ज्यो दक्षिणे प्लक्ष एव च ।
न्यग्रोधः पह्निमे भागे उत्तरे चाप्युदुम्बरः ॥ ४॥
अत्थोऽग्निभयं कुर्यात् प्लक्ष कुर्यात् प्रमादकम् ।
न्यग्रोधः शस्त्रसम्पातं कुक्षिरोगमुदुम्बरः ॥ ५॥
काष्ठेष्टकातुपाआरपाषाणास्थिसरीसृपान् ।
हलाग्रेणोद्धृतान् दृष्टा तत्र विद्याआदिदं फलम् ॥
काष्ठेप्वग्निभयं विद्यादिष्टकासु धनागमम् ।
अआरेषु तथारोगं तुषेप्वेव धनक्षयम् ॥
पाषाणेप्वप कल्याणं कुलनाशं तथास्थिषु ।
सरीसृषेषु सर्वेषु तादृग्भ्यो भयमादिशेत् ॥
अनूषरा स्निग्धवती प्रशस्ता च बहूदका ।
तृणोपलान्विता या सा मान्या वास्तुविधौ धरा ॥ ९॥
इति वास्तुविद्यायां वसुधालक्षणं नाम द्वितीयोऽध्यायः ।

---

चतुर्थाध्यायः

अथ द्वे प्राङ्मुखे द्वारे कुर्याद् द्वे दक्षिणमुखे ।
द्वारे प्रत्यङ्मुखे द्वे च द्वे च कुर्याच्छुदङ्मुखे ॥
माहेन्द्रे प्राङ्मुखं द्वारं प्रशस्तं शिष्टजातिषु ।
अपरं तु तथा द्वारं जयन्ते प्राह निह्नयात् ॥ २॥
गृहक्षते तथा द्वारं क्षत्रियाणामभीष्टदम् ।
गन्धर्वे नियतं द्वारं वैश्यानां तदभीष्टदम् ॥
पुष्पदन्ते तु यद् द्वारं शूद्राणां तदभीष्टदम् ।
सुग्रीवे चापरं द्वारं भल्लाटे सार्ववर्णिकम् ॥
म्उक्ष्ये च नियतं द्वारं भल्लाटादपरं स्मृतम् ।
अथद्वारफलं वक्षे प्रोक्तं वास्तुविदां वरै ॥ ५॥
आदित्ये स्थापिते द्वारे पुत्रनाशोऽथ जायते ।
मैत्रभस्तु सत्ये स्याद् भृशे पत्यावियुज्यते ॥ ६॥
अन्तरिक्षे कृतेद्वारे विनाशमपि गच्छति ।
पावके स्थापिते द्वारे म्रियते वेश्मनः पतिः ॥ ७॥
तत्र पूष्णि कृते द्वारे नश्येद् दारुणशोषणैः ।
वितथे स्थापिते द्वारे पत्युर्मरणमादिशेत् ॥ ८॥



From http://sanskritdocuments.org

गृहक्षतपदे द्वारे कृते सम्पद्विवर्धनम् ।
यमे द्वारे कृते सर्वनाशं च मरणं वदेत् ॥ ९ ॥
गन्धर्वे निर्मिते द्वारे सर्वकर्मविवर्धनम् ।
भृराजे विपद् द्वारे मृगे सस्यविनाशनम् ॥ १० ॥
निऋ&0Tr; तौ मरणं विद्याद् दौवारिकपदे रयम् ।
सुग्रीवे सर्वलाभः स्यात पुष्पदन्तेभवेद् गुणः ॥११ ॥
वारुणे स्थापिते द्वारेङमित्रद्वा चोरतो भयम् ।
असुरे स्थापिते द्वारे नित्यमायासकारणम् ॥१२ ॥
शोषणे स्थापिते द्वारे शुष्यते नं विनश्यति ।
रोगे यदि कृते द्वारे पाण्डुरोगी भवेन्नरः। १३
वातस्थाने कृते द्वारे नरो वातेन पीडयते ।
नागे च निर्मिते द्वारे शीघ्&1Bra; आ नागश्चायं भवेत् ॥ १४ ॥
मुख्ये यदि कृतं द्वारं सद्यो ब्राह्मण्यमाप्नुयात ।
भल्लाटे च कुते द्वारे वैशिष्टये लभते नरः ॥१५ ॥
सोमे चैव कुते द्वारे यज्ञशीलो भविष्यति ।
अर्गले च कुते द्वारे जलेन म्रियते नरः ॥ १६ ॥
अदितौ च कृते द्वारे कुक्षिरोग विनिर्दिशेत ।
उदितौ च कृते द्वारे वनिताकुलनाशनम् ॥ १७ ॥
रुद्रे यदिकृतं द्वारं वन्हिना दहयते गृहम् ।
पर्जन्ये च घनं नश्येत् जयन्ते जयमाप्नुयात ॥ १८ ॥
माहात्म्यं चैव माहेन्द्रे यदि द्वारं कृतं भवेत् ।
अन्तर्द्वाराणि चोक्तानि बहिर्द्वारमथोच्यते ॥१९ ॥
यत्रोन्नतं ततो द्वारं यत्रनिम्नं ततो गृहम् ।
गृहे चाप्यष्टमे राशौ तत्र द्वार न कारयेत ॥ २० ॥
गृहक्षते च माहेन्द्रे ब्राह्मणनां प्रकिर्तितम् ।
महिधरे च सोमे च फल्लाटार्गलयोस्तथा ॥ २१ ॥
शयनियं तु कर्तव्ये प्रशस्तं पूर्वतः शिखा ।
गृहक्षते पुष्पदन्ते द्वारे स्यात क्षत्रियससरू तु ॥२२ ॥
वितथे चान्नभूमिं च गोष्ठागारं तथासुरे ।
स्नानभूमिं च गान्धर्वे सदा कुर्याद् विशेषतः ॥२३ ॥
फल्लाटे पुष्पदन्ते च द्वारे वैश्यस्य पूजिते ।
यमे विवस्वति प्रोक्तं गन्धर्व च गृहक्षते ॥२४ ॥
शयनियं प्रकर्तव्यं विद्वन्दिईः प्राक शिरो भवेत् ।
पुष्णि वा वारूणे पंथाः पूर्वोक्तं वा महानसम् ॥२५ ॥
गन्धर्वे स्नानभूमिः स्याद् गोष्ठागारं तथासुरे ।
पैतृके गर्भभूमिः स्याद् वास्तुविभ्दिरितीरितम् ॥२६ ॥


From http://sanskritdocuments.org

फल्लाटे च महेन्द्रे च द्वारे शूद्रस्य पूजिते ।
सुग्रीवः पुष्पदन्तह्न मित्रोऽथ वरूणस्तथा ॥ २७॥
यस्तत्र शयनीयं स्यात् सर्वेषामितिं च स्थितिः ।
दौवारिकप्रमाणं स्याद् भूमिर्वै पैतृकी स्मृता ॥ २८ ॥
महानासं च पूष्णि स्याद् गोष्ठागारं तथासुरे ।
स्थानभूमिं तु गन्धर्वे सदा कुर्याद् विशेषतः ॥ २९ ॥
यदुक्तं वेदिविस्तारमायामं चापि तत्समम् ।
एवं कृत्वा चतुरश्रं तन्मध्ये सूत्रमालिखेत ॥ ३०॥
प्रागग्रे चाप्युदग्वक्र&1Bra;ं ब्राह्मं याम्यं च नामतः ।
सूत्रद्वयेन सा वेदिह्नतुखण्डी च संभवेत् ॥ ३१॥
मानुष्यमथ याम्यं च दैवमासुरमेव च ।
ऐशान्यादिपदानां च नामान्येवं विदुर्बुधाः ॥ ३२॥
स्थानं नृणां तु मानुष्ये दैवे चापीति केचन ।
निद्यावासुरयाम्यो तु पदे गृहविधौ नृणाम् ॥ ३३॥
सल्प्य तस्यां भुवि वेदिकायां स्फीतां विदध्यादध वास्तुपूजाम् ।
कृत्वा चतुषष्टिपदानि भूयः कोणेषु सूत्रे विनिवेशयेद् ॥ ३४॥
वास्तुदेहस्थितास्तत्र त्रिपत्र्ह्नशत्तु देवताः ।
पूजयेत् क्रमशस्तासां विभागः प्रोच्यतेऽधुना ॥ ३५॥
ब्रह्मा मध्यचतुष्पद्प्राणिहितो दिक्षु द्विपाद्या स्थिता
स्तद्वाह्येऽथ चतस्त्र एकपदके द्वे द्वे स्थिते पायो ।
कोणस्याप्यथ षोडशार्धपदगाः काणेषु बाहये तथा
दिक्स्थाः षोडश देवता द्विपदगाह्नाष्टौ बहिर्दिग्गताः ॥३६॥
ईशान पर्जन्यजयन्तशक्रध्वान्तापनुत्सत्यभृशान्तरिक्षाः ।
अग्निह्नपूषा वितथाभिधानो गृहक्षतः प्रेतनिवासभर्ता ॥३७॥
गन्धर्वसंज्ञस्त्वथ भृराजो मृगाभिधानः पितरः प्रशस्ताः ।
दौवारिकः पह्निमपूर्वसंस्थः सुग्रीवसंज्ञस्त्वथ पुष्पदन्तः ॥३८॥
भूयः प्रशस्तोवरूणोऽसुरह्न शोषह्न रोगः पवनो भुजः ।
मुख्योऽथ भल्लाटनिशाकरौ च भूयोऽर्गलादित्युदितिक्रमेण ॥३९॥
विष्कम्भबाहयस्थपदप्रविष्टा द्वात्रिंशदेताः परितः प्रदिष्टा ।
अन्तःस्थकोणार्धपदेषु चाष्टौ वक्ष्ये चतस्त्रह्न दिशासु योज्याः ॥४०॥
सवित्रः सविता हुताशनदिशि ब्रह्माग्निमध्येऽर्धगा
विन्द्रह्नेन्द्रजयह्न राक्षसदिशि ख्यातौ पदार्थस्थितौ ।
रुद्रो रुद्रजयह्न वायुदिशि च व्यापतो तथेशार्धगा
वापह्नापि तथापवत्स इति च द्वन्द्वस्थिता देवताः ॥ ४१॥
पूर्वादिदिक्षु क्रमशो द्विपाद्या स्यादार्थकह्नापि तथा विवस्वान ।
मित्रह्न पह्नात् तु महीधरह्न ब्रह्मा च मध्यस्थचतुष्पदस्थः ॥ ४२॥



From http://sanskritdocuments.org

दिक्षु काणेषु बाहयस्थाः प्रवदामि पुनः क्रमात् ।
शर्वः स्कन्दोऽर्यमाहयेह्न जम्भकः पिलिपित्र्छकः ॥ ४३॥
चरकी च विदारी च पुतना पापराक्षसी ।
संस्थाप्यैवं चतुःषष्टिपदेष्वेताः प्रपूजयेत् ॥४४॥
एवं चाष्टकृतिप्रभिन्नपदगा ग्रह्मा चतुष्कोष्ठगो
मध्ये तस्य चतुष्पदप्रणिहिता दिक्स्धाश्नतस्त्रो बहिः ।
द्वे द्वे कोणगते तथैकपदगे द्वे द्वे पदार्थस्थिते
द्वे द्वे दिक्षु बहिः पदद्वयगते शिष्टाः पदैकस्थिताः ॥४५॥
आश्रित्य मार्गे मतिमानथैषाम् एकं च वास्तुं परिकल्प्य तत्र ।
अएषु तस्याप्यथ देवतास्ताः सस्त्ल्प्य सम्यक् परिपूजयेच्च ॥ ४६॥
आसीत् पुरा सकललोकभयरह्न क्रूरोऽसुरो भुजबलाइगतिगर्वितह्न ।
क्षोणीतले विनिहितो विजितैः प्रशान्तो देवैः स वास्तुपुरुषह्नसंस्थः ॥ ४७॥
ईशे तस्य शिरस्तदा विनिहितं पादौ निऋत्या स्थितौ
वायव्ये च हुताशने च भुजयोः संस्थापितौ कूर्परौ ।
क्षिप्तं वक्षासि हस्तयोस्तलमतः प्रोत्तानतां प्रापितस्
स्तस्याएषु च देवता विनिहिता यद्वत् प्रवक्ष्ये तथा ॥ ४८॥
तस्येशः शिरसि स्थितह्न नयने सव्ये लथा दचिणे
पर्जन्यह्न तथोदितिह्न वदने चापः पुनः संस्थ्तिः ।
भूयस्तस्य च कन्धरे विनिहितः स्यादापवत्सस्तथा
पह्नात तस्य तथांसयोर्विनिहिते स्यातां जयन्तादिती ॥ ४९॥
भूयो महेन्द्रप्रमुखार्गलाद्याः संस्थापिताः स्युर्भुजयोः क्रमेण ।
सावित्ररुद्रौ सविता सविता जयह्न भूयः प्रकोष्ठद्वययंस्थिताः स्युः ॥५०॥
ब्रह्मा च नाभौ स्तनयोर्द्वये च संस्थापितावार्यमहीधरौ च ।
कुक्षौ विवस्वांह्न तथैव मित्रः पादद्वये स्युः पितरो निविष्टाः ॥ ५१॥
इन्द्रह्न मेढे वृषणद्वये च पह्नात तथैवेन्द्रजयो निविष्टाः ।
नाम्ना स्वकेन प्रणवादिनैतान् मन्त्रेण सम्यक् परिपूजयेह्न ॥५२॥
इति वास्तुविद्यायां वास्तुपुरुषसंस्थानं नाम चतुर्थोऽध्यायः ।

---

अथ पञ्चमोध्यायः ।

चतुःषष्टिपदं कुर्यान्मनुष्येण पदेन वा ।
मध्ये चतुष्पदं तत्र ब्रहमल्यमण्डपम् ॥ १॥
दैविक्यावृतिका च पदैर्द्वादशभिः स्मृता ।
आवृतिः पुनरन्या तु पंक्तिद्विघ्नपदान्विता ॥ २॥
तत्र वेश्म प्रकुर्वीत पदसम्मितविस्तरम् ।
आयामं द्विपदं कुर्यात सो वृतिर्मानुषी स्मृता ॥ ३॥
वैशाची सा विनिन्या स्यादष्टाविंशत्पदान्विता ।
आवृतिर्या तृतीया स्याद् गृहं तत्र न विन्यसेत ॥ ४॥


From http://sanskritdocuments.org

अथावृतौ तु दैविक्यां मन्दिरं कारयेन्नृणाम् ।
पदमानसमः स्तारो द्विपदो दर्धि उच्यतै ॥ ५॥
यावान् गृहस्य विस्तारस्तावान् पादसमृच्छ्रयः ।
पादोनह्लाङ्र्धमेवं स्यादुत्तमाधममध्यमम् ॥ ६॥
अथवा समचलुरश्रं षोडशपदमेव कल्पयेत् क्षेत्रम् ।
तत्र च नैऋतनिऋतौ मन्दिरमुदितं च वैदिके खण्डे ॥ ७॥
निऋतावैशे कुर्यादीशेशानान्तमुत्तमं स्थानम् ।
मानुष्येऽपि च खण्डे निऋतिपदं वेश्मयोग्यमेव भवेत ॥ ८॥
मानुष्यं तत् प्रोक्तं यत्र चतुष्कं पदं भ्वेदीशे ।
नैऋ&0Tr; तकोणचतुष्कं दैविकमुदितं चतुष्पदं खण्डम् ॥ ९॥
वायौ कीर्तिलमासुरमिति तद्ययमखण्डंवन्हिकोण वेश्म पदम् ।
निन्द्यावासुरयाम्यौ संग्राहयो देवमानुषौ खण्डौ ॥ १०॥
तत्र चतुषष्टिर्वाप्येकाशीतिस्तु वाथ पदशतकम् ।
तेषु च यत्र रूचिः स्यातू तेन च कुर्यादशालयं प्राज्ञः॥ १०॥
वृतिपादस्य तु बहलंकुर्याद् विस्तारबाहयतः पह्लात ।
सौत्रं बहलार्धं यत् तावद्बहलं च कारयेत तलिपम् ॥ १२॥
तत्र च वप्रं कुर्यात् तुर्यश्रं द्वारगेहसहृशमपि ।
यद्वा पलिधं कुर्यात् पाषाणैर्बध्दभित्तिसमचलुरम् ॥ १३॥
कण्टकशाखाभिर्वा वृतिमथकरभेक्षणाक्षमां कुर्यात् ।
उत्तममत्र च वप्रं मध्यममुदितं तथैव परिधमपि ॥ १४॥
अधमं शाखावरणं कुर्यादिप्वेकमर्थसुलभवशात् ।
आवृत्यन्तर्भागे दिक्षु च वृक्षान् समादधेत् प्राज्ञः ॥ १५॥
पनसः प्राच्यां श्रेष्ठः क्रमुको याम्येऽथ पह्निमे क्एरः ।
सोमे चुतो धन्यो नागस्तत्रैव केसरः प्राच्याम् ॥ १६॥
तिन्त्रिण्युदिता याम्ये छत्री श्रेष्ठोऽथ पह्निमे कथिता ।
अन्तःसारा वृक्षा यदि संति हयन्तरेव यन्तु च ते ॥ १७॥
ये सन्ति त्वचिसारास्तेपि च सन्त्वेव सर्वतो बाहये ।
सकलः सारो येषां ते वृक्षः सर्वदिक्षु युज्यन्ताम् ॥ १८॥
वृक्षा निस्सारा ये तेषा क्षेत्रेषु वर्तन नेष्टम् ।
जातीनागलताद्या लतिका रम्भाह्न सर्वतः शस्ताः ॥ १९॥

Encoded by V. R. Ambatkar ambatkar@sancharnet.in
Trivendrum Sanskrit Series No. XXX
Edited by T. Ganapati Shastri
Printed at Travancore Government Press
1913 - Trivendrum



From http://sanskritdocuments.org

Please send corrections to sanskrit@cheerful.com
Last updated July 20, 2014
From http://sanskritdocuments.org .
The text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or commercial purpose without permission.

sanskritdocuments.org



From http://sanskritdocuments.org